## लुङ्लङ्लृङ्क्ष्वडुदात्तः । (७१/२२०६)

लुङ लङ लृङ इत्येतेषु परतोऽङ्गस्य अडागमो भवति, [1]उदात्तश्च स भवति । लुङ – अकार्षीत् । अहार्षीत् । लङ – अकरोत् । अहरत् । लृङ – अकरिष्यत् । अहरिष्यत् ॥

## आडजादीनाम् । (७२/२२५४)

आडागमो भवति अजादीनां [2]लुङ्लङ्लृङ्क्षु परतः, उदात्तश्च [3]स भवति । ऐक्षिष्ट । ऐहिष्ट । औब्जीत् । औम्भीत् । लङ – ऐक्षत । ऐहत । औब्जत् । औम्भत् । लृङ – ऐक्षिष्यत । ऐहिष्यत । औब्जिष्यत् । औम्भिष्यत् ।

इह [4]ऐज्यत, औप्यत, औह्यत इति लङि कृते लावस्थायामडागमादन्तरङ्गत्वाल् लादेशः क्रियते, तत्र कृते विकरणो नित्यत्वादडागमं [5]बाधते । शब्दान्तरप्राप्तेरडागमस्यानित्यत्वम्, कृते हि विकरणान्तस्याङ्गस्य तेन भवितव्यम्, अकृते तु धातुमात्रस्य शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति । ननु शब्दान्तरादिति विकरणोऽनित्यः? विकरणे कृते सम्प्रसारणमडागमान् नित्यत्वादेव भवति, सम्प्रसारणे च कृतेऽजाद्यङ्गं जातमिति[6] 'आडजादीनाम्' इत्याडागमः ॥

## छन्दस्यपि दृश्यते । (७३/३५४५)

छन्दसि विषये आडागमो दृश्यते । [7]यत्र हि विहितः ततोऽन्यत्रापि दृश्यते । 'आडजादीनाम्' (६.४.७२/२२५४) इत्युक्तम्, अनजादीनामपि दृश्यते । 'सुरुचो वेन आवः' (वा.सं. १३.३) । [8]आनक् । आयुनक् । आव. इति वृञो लुङि मन्त्रे घसह्वर (२.४.८०/३४०२) इति लेर्लुकि कृते [9]च भवति । तथा आनक् इति नशेः[10] । आयुनक् इति युजेर्लङि ॥

## न माङ्योगे । (७४/२२२८)

माङयोगे लुङलङलृङक्षु यदुक्तं तन्न भवति । मा भवान् कार्षीत् । मा भवान् हार्षीत् । मा स्म [11]करोत् । मा स्म [12]हरत् । मा भवानीहिष्ट । मा भवानीक्षिष्ट । [13]मा स्म भवानीहत । [14]मा स्म भवानीक्षत ॥

## बहुलं छन्दस्यमाङ्योगेऽपि । (७५/३५४६)

छन्दसि विषये [15]माङयोगेऽपि बहुलम् अडाटौ भवतः, [16]अमाङयोगेऽपि न भवतः । अमाङयोगे तावत् – 'जनिष्ठा [17]उग्रः' (ऋ. १०.७३.१) । '[18]काममूनयीः' (ऋ. १.५३.३) । काममर्दयीत् । माङयोगेऽपि भवतः – 'मा वः क्षेत्रे परबीजान्यवाप्सुः' (आ.ध. २.१३.६) । मा अभित्थाः । मा आवः ॥

---

1. उदात्तश्च स भवति नास्ति क. 2. अङ्गानाम् त्यधिकम् फ.ह. 3. स नास्ति ई. 4. कथम् इत्यधिकम् ह. 5. बाध्यते ह. 6. आडजादीनामिति नास्ति ह 7. यतः ड. 8. कुरुते धेनु रायः आनक् ह. 9. च नास्ति ह. 10. वा इति कुत्वे कृते भवति इत्यधिकम् ह.ड. 11–12. भवान् इत्यधिकम् फ. 13. उदाहरणमिदं नास्ति फ. 14. उदाहरणमिदं नास्ति क. 15. अमाङ्योगेऽपि ब. फ. इ. ह. 16. अपिशब्दान्माङ्-योगेऽपि ह. 17. उग्रतः क. 18. आकाममानयीत् क.